**अनुयोगिन्** त्रि० अनुयुङ्क्ते अनु+युज–घिनुण्। प्रश्नकारके।

**अनुयोज्य** त्रि० अनुयुज्यते नियुज्यते "अनु+युज–शक्यार्थे आवश्यकार्थे वा ण्यत्। प्रश्नार्हे अवश्यनियोज्ये, त्वया कथमित्थं कृतमित्याक्षेपेण कृतप्रश्ने, आज्ञाकारके, दासादौ च "वासवानुयोज्यो दुष्मन्तः प्रणमति" शकु०।

**अनुरक्त** त्रि० अनु+रन्ज क्त। अनुरागयुक्ते, अनुगतः रक्तं रागम् अत्या०स०। प्राप्तरक्तवर्णे।

**अनुरक्ति** स्त्री अनु+रन्ज–क्तिन्। अनुरागे।

**अनुरञ्जक** त्रि० अनुरञ्जयति अनुरक्तं करोति अनु+रन्ज–णिच्–ण्वुल्। अनुरागयुक्तकारके।

**अनुरञ्जन** न० अनु+रन्ज–णिच्–भावे ल्युट्। अनुरागयुक्तकरणे "विश्वेषामनुरञ्जनेन जनयन्नानन्दमिति" रामा०। कर्त्तरि ल्यु। अनुरञ्जके त्रि०।

**अनुरञ्जित** त्रि०अनु+रन्ज–णिच्–कर्म्मणि क्त। यस्य अनुरागः कृतः तस्मिन्, अनुरक्तीकृते जने।

**अनुरणन** अनु+रण–ल्युट्। घण्टादिशब्दज प्रतिध्वन्यात्मके शब्दसन्ताने व्यञ्जनरूपशब्दशक्तिभेदे, ध्वनिभेदे च।

**अनुरत** त्रि० अनु+रम–कर्त्तरि क्त। अनुरक्ते, अभिरते च।

**अनुरति** स्त्री अनु+रम–भावे क्तिन्। अनुरागे।

**अनुरस** त्रि० अनुगतो रसम्। माधुर्य्यादिरसानुगते "भूमिजं गुरु नातिवातलं भूमितस्तस्यानुरस" इति "मधुरानुरसं रूक्षं लवणानुरसं लघु। नार्य्यास्तु मधुरं स्तन्यं कषयानुरसं हिममिति" च सुश्रुतम्।

**अनुरहस** त्रि० अनुगतं रहः अत्या०स० अच्समा०। निर्ज्जनदेशानुगते।

**अनुराग** पु० अनु+रन्ज+घञ्। अत्यन्तप्रीतौ, स्नेहे च। अनुरूपो रागः प्रा०स०। अनुरूपरागे। "अनुरागवन्तमपि लोचनयोरिति" माघः "प्रणादस्तु शब्दः स्यादनुरागज" इत्यमरः। "प्रियानुरागस्य मनःसमुन्नतेरिति" रघुः। अनुगतो रागं गतिस०। प्राप्तलौहित्यवर्णे त्रि०।

**अनुरागिन्** त्रि० अनु+रन्ज–घिनुण् कुत्वम्। अनुरागयुक्ते स्त्रियां ङीप्। "वेश्याञ्चाननुरागिणीमिति" सा०द०

**अनुरात्र** अव्य० रात्रौ विभ० अव्ययी० अच्समा०। रात्रावित्यर्थे, प्रतिरात्रे च। "तस्मात् स्त्र्यनुरात्रं पत्याविच्छते" इति श्रुतिः। अनुगतो रात्रिम्। रात्र्यनुगते त्रि०।

**अनुराधा** स्त्री० अनुगता राधां विशाखाम् अत्या०स०। सप्तविंशतिधाविभक्तस्य राशिचक्रस्य सप्तदशभागात्मके नक्षत्रभेदे "रेवत्युत्तररोहिणीमृगशिरोमूलानुराधामघेति" ज्योति०। "राधे विशाखे पुष्यवानुराधाज्येष्ठासु नक्षत्रेष्विति" श्रुतिः। "शिखिगुणरसेन्द्रियानलशशिविषयगुणर्तुपञ्चवसुपक्षाः। विषयैकचन्द्रभूतार्णवाग्निरुद्राश्विवसुदहनाः। भूतशतपक्षवसवो द्वात्रिंशच्चेति तारकामानम्। क्रमशोऽश्विन्यादीनां कालस्ताराप्रमाणेन। नक्षत्रजमुद्वाहे फलमब्दैस्तारकामितैः सदसत्। दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्य वा वाच्यः" इति वृ०उक्तेस्तस्याः चतुस्तारात्मकत्वम्। अश्वियमदहनकमलजशशिशूलभृददितिजीवफणिपितरः। योन्यर्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राश्च। शक्रो निरृतिस्तोयं विश्वे देवा हरिर्वसुर्वरुणः। अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम्" इति वृहत्संहितोक्तेस्तस्या मित्रदेवताकत्वम्। तस्य च योगतारा "ज्येष्ठाश्रवणमैत्राणां वार्हस्पत्यस्य मध्यमा" इति सूर्य्यसि० उक्तेर्मध्यमा तारा। तत्र भवः अणो लुक् "लुक्तद्धितलुकीति" पा० स्त्रीप्रत्ययस्य लुक्। अनुराधस्तज्जाते त्रि०। नक्षत्रेण युक्तः काल इत्यणस्तु लुप् "लुपि युक्तवद्व्यक्तिवचनमिति" पा० अनुराधा अनुराधानक्षत्रयुक्तकाले ततः सप्तम्यर्थे तृतीयेति भेदः। पृ० दीर्घः। अनूराधाप्यत्र।

**अनुरुद्ध**–त्रि अनु+रुध–कर्म्मणि क्त। अपेक्षिते।

**अनुरुध्** त्रि०अनु+रुध–क्विप्। अनुरोद्धरि अपेक्षके। कर्मणि क्विपि वेदे उपसर्गदीर्घः। अनुरुद्धे। "आक्षित्पूर्व्वास्वपरा अनूरुद् ऋ० ३,५५,५, "अनूरुद् अनुरुद्धमिति" भा०।

**अनुरूप** अव्य० रूपस्य सादृश्ये योग्यत्वे वा अव्ययी०। रूपस्य सादृश्ये, योग्यतायाञ्च। अर्श आद्यचि। तद्वति त्रि०। "अथानुरूपाभिनिवेशतोषिणेति" कुमा०। "सत्वानुरूपा सर्व्वस्य श्रद्धा भवति भारत" गीता। द्वादशाहसाध्ये यागे वहिष्पवमानगतानां त्रयाणां तृचानां मध्ये मध्यमे तृचे। "स्तोत्रियानुरूपौ तृचौ भवतः वृषण्वन्तस्तृचा भवन्ति तत्र उत्तमः पर्य्यास" इति ता०ब्रा०। प्राकृतानां वहिष्पवमानगतानां त्रयाणां तृचानां स्तोत्रियः, अनुरूपः, पर्य्यासश्चेति त्रीणि नामानीति भा०।

**अनुरोध** पु० अनु+रुध–घञ्। अनुसरणे, आराध्यादेरिष्टसम्पादनेच्छायाञ्च। "मित्रस्यानुरोधेन द्विविधं स्मृतमासनमिति" "नानुरोधोऽस्त्यनध्याये" इति च मनुः।

**अनुरोधिन्** त्रि०अनु+रुध–णिनि। अपेक्षके। स्त्रियां ङीप्। "पतिव्रतानां समयानुरोधिनीति" रामा०। [भाषणे।

**अनुलाप** पु० अनुवीप्सायां वारंवारं लप्यते लप–घञ्। मुहु-

**अनुलिप्त** त्रि० अनु+लिप–क्त। गन्धादिना कृतानुलेपे